गन्धनिष्ठाधेयतानिरूपिताधिकरणतावत्त्वमिति पृथिव्या लक्षणम्। इदं लक्षणं पृथिव्यां वर्तते। कथमिति चेत्– गन्धः पृथिव्यां वर्तते चेदाधेयः गन्धः। आधेयता गन्धनिष्ठा। अधिकरणं पृथिवी। अधिकरणता पृथिवीनिष्ठा। पृथिवीनिष्ठाधिकरणता गन्धनिष्ठाधेयतया निरूपिता भवति।

तथाच गन्धनिष्ठाधेयतानिरूपिताधिकरणता। तादृशाधिकरणता पृथिवीनिष्ठा चेदधिकरणतावती पृथिवी। तथाच गन्धनिष्ठाधेयतानिरूपिताधिकरणतावत्त्वं पृथिव्यां वर्तत इति लक्षणसमन्वयः।

नन्वस्य लक्षणस्य जलेऽतिव्याप्तिः। कथमिति चेत् पुष्पसंयुक्ते जले गन्धः परिदृश्यते चेदाधेयो गन्धः। आधेयता गन्धनिष्ठा। अधिकरणं जलम्। अधिकरणता जलनिष्ठा। जलनिष्ठाधिकरणता गन्धनिष्ठाधेयतया निरूपिता भवति। अधिकरणता जलनिष्ठा चेदधिकरणतावज्जलम्। अधिकरणतावत्त्वं जले। एवञ्च गन्धनिष्ठाधेयतानिरूपिताधिकरणतावत्त्वं जले वर्तत इत्यतिव्याप्तिः।

तत्परिहाराय गन्धनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वं निवेशनीयम्। तथाच समवायसम्बन्धावच्छिन्नगन्ध–निष्ठाधेयतानिरूपिताधिकरणतावत्त्वमिति लक्षणं सम्पन्नम्।

इदं लक्षणं पृथिव्यां वर्तते। तथाहि– पृथिव्यां गन्धः समवायसम्बन्धेन वर्तते। गुणगुणिनोः समवाय इत्यङ्गीकारात्। एवञ्चाधेयो गन्धः। आधेयता गन्धनिष्ठा। गन्धनिष्ठाधेयतायां समवायसम्बन्धोऽवच्छेदकः।

कथमिति चेत् 'यो येन सम्बन्धेन यत्र वर्तते तन्निरूपितायां तन्निष्ठाधेयतायां सः सम्बन्धोऽवच्छेदकः' इति न्यायात्। यः= गन्धः, येन सम्बन्धेन= समवायसम्बन्धेन, यत्र वर्तते= पृथिव्यां वर्तते, तन्निरूपितायां= पृथिवीनिरूपितायां, तन्निष्ठाधेयतायां= गन्धनिष्ठाधेयतायां, सः सम्बन्धः= समवायसम्बन्धोऽवच्छेदकः। गन्धनिष्ठाधेयतायां समवाय–सम्बन्धोऽवच्छेदकश्चेत् गन्धनिष्ठाधेयता समवायसम्बन्धावच्छिन्ना। कथमिति चेत् 'यः सम्बन्धो यस्यामवच्छेदकः सा तत्सम्बन्धावच्छिन्ना' इति न्यायात्। यः सम्बन्धः=समवायसम्बन्धः, यस्यामवच्छेदकः=गन्धनिष्ठाधेयतायामवच्छेदकः,